National Journal of
Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2025; 1(60): 245-251
© 2025 NJHSR
www.sanskritarticle.com

**चञ्चल**
सर्वदर्शन विभाग , दर्शन सङ्काय,
श्री लाल बहादुर शास्त्री राष्ट्रीय संस्कृत-
विश्वविद्यालय , नई दिल्ली

**Correspondence:**
**चञ्चल**
सर्वदर्शन विभाग , दर्शन सङ्काय,
श्री लाल बहादुर शास्त्री राष्ट्रीय संस्कृत-
विश्वविद्यालय , नई दिल्ली

# शैवागमेषु भक्तेःस्वरूपम्

**चञ्चल**

भारतीयजनमानसे भक्तिभावस्यउत्पत्तिरादिकाले एव जातम्। अनेके आचार्याः धर्मसम्प्रदायप्रवर्तक-सन्ताश्चस्वस्वमतानुसारंभक्तेः परिभाषां, निष्कर्षंचप्रदत्तवन्तः। सर्वेषां मतानां सारभूतंतत्त्वंतुएषः एव – यत्भक्तस्यवा उपासकस्यपरमेश्वरे आत्यन्तिकी भावनाभवति।

**भगवताश्रीकृष्णेनोक्तम्—**

"येजनाःमांसमर्पितात्मानः, सम्पूर्णयाभक्त्यामयिचित्तंनिवेश्य, अनन्यचेतसः निरन्तरंमांपूजयन्ति, तानहं-परमंभक्तंमन्ये।तथापियेनिर्गुणंसर्वव्यापिनंचयथार्थंजानन्ति, तेऽपिमांप्राप्नुवन्ति।" श्रीमद्भागवतेनवधाभक्तेः भेदाःनिर्दिष्टाः श्रवणं, कीर्तनं, स्मरणं, पादसेवनं, अर्चनं, वन्दनं, दास्यं, सख्यं, आत्मनिवेदनंच।

एतेषांत्रयःवर्गाःदृश्यन्ते–

**(१) श्रवणं, कीर्तनं, स्मरणं।**

**(२) पादसेवनं, अर्चनं, वन्दनं।**

**(३) दास्यं, सख्यं, आत्मनिवेदनम्।**

**"श्रवणंकीर्तनंविष्णोःस्मरणंपादसेवनम्।**
**अर्चनंवन्दनंदास्यंसख्यमात्मनिवेदनम्॥"**[1]

**नारदस्यमतेभक्तिः परमप्रेमस्वरूपा। शाण्डिल्यस्यमते, ईश्वरनिष्ठापरानुरक्त भक्तीनाम्वैशिष्ट्यमस्ति – सारागात्मिका, अहेतुकीचभवति।**

सत्यभक्तिः सायासहजभावरूपेणजीवहृदयेपरमेश्वरेप्रतिउदेति। तस्यामध्येईश्वरातिरिक्तंकिञ्चिदपिन-वाञ्छ्यते। श्रीकृष्णस्यमते, सएवभक्तःयःआत्मानंपरमेश्वरेसमर्पयति, नब्रह्मपदं, नइन्द्रपदं, नस्वर्गराज्यं, नयोगसिद्धिं, नापुनर्भवम्इच्छति।

**"नपारमेष्ठ्यंनमहेन्द्रधिष्ण्यंनसार्वभौमंनरसाधिपत्यम्।**
**नयोगसिद्धीःअपुनर्भवंवामय्यर्पितात्माइच्छतिमद्विनान्यत्॥"**[2]

*गीतातुभक्तिं "अनन्याभक्ति" इतिनिर्दिशति।*

*भक्तस्यपञ्चलक्षणानि–*

**(१) ईश्वरार्थंकर्म।**
**(२) ईश्वराश्रयत्वम्।**
**(३) ईश्वरभक्ति।**
**(४) अनासक्तता।**
**(५) वैरभाववर्जिताच।**

एतेनअनन्याभक्तिलभ्यते। शरणागतिस्वभावाभक्तिरेवमुख्यलक्षणम्।गीतायाम्श्रीकृष्णः अन्तेउक्तवान्–

**"सर्वधर्मान्परित्यज्यमामेकंशरणंव्रज।**
**अहंत्वांसर्वपापेभ्योमोक्षयिष्यामिमाशुचः॥"**[3]

भक्तःईश्वरमेवपरमश्रेयःरूपेणपश्यति।सत्यभक्तिःयायानिष्कामतयाकेवलंईश्वरसेवाकृतेसाध्यते। भक्तस्यहृदयेकेवलंभगवानेवविराजते।

वास्तवभक्तेः स्वरूपं — सर्वथाभगवान्मयताएव। भक्तिरसामृतसिन्धु-अनुसारं – काम्यवस्तुनियः स्वाभाविकः रागः दृश्यते, सएवरागः। सएवपरमाधिष्ठितःरागःभक्तिरूपेणरागात्मिकाभवति।

**"धिष्ठताइष्टेस्वारसिकोरागःपरमाधिष्ठताभवेत्।**
**तन्मयीयाभवेद्धक्तिःसारागात्मिकोदिता॥"**[4]

रामप्रसादस्यदृष्ट्या भक्तिभूमिवत्समानाम् मुक्तितुतस्यादासीइव। वास्तव भक्तौ कृतज्ञता अपिनभवति। कारणं – कृतज्ञतातदाभ-वतियदाकिञ्चिद् आकाङ्क्षितंप्राप्तंभवति परन्तुनिष्कामभक्तेः ईश्वराति-रिक्तंकिञ्चिदपिकाम्यंनास्ति।

ध्रुवप्रह्लादयोः उदाहरणेननिष्कामभक्तेः परमावस्थादृश्यते। ध्रुवः प्रारम्भेअर्थार्थीभक्तः आसीत्, परन्तुअन्तेशुद्धाअहेतुकीभक्तिंप्राप। प्रारम्भेसाम्राज्यंवाञ्छन्, अन्ते केवलंभगवान्एवप्रार्थितवान्।

**भक्तेःभेदाः**

भक्तेःद्वौप्रमुखौभेदौ–

(१) **गौणी** वा **वैधीभक्ति** (हेतुकी)।

(२) **मुख्या** वा **रागात्मिकाभक्ति** (अहेतुकी)।

हेतुकीभक्तिः निम्नस्तरेभवति, प्रयोजनाधीनाच। साप्रारम्भिकरूपा-अस्ति, यापरं शुद्धभक्तिंसाधयति।

भक्तेः त्रीणिगुणात्मकानिरूपाणि अपि—

**तामसी, राजसी, सात्विकी।**

**तामसीभक्ति** — चौराः, असामाजिकजनाः कालीदिकंआराध्यं-कुर्वन्तिस्वकर्मसिद्धये।

**राजसीभक्ति** —सांसारिकसमृद्ध्यर्थं, विजयोत्सवाय।

**सात्विकीभक्ति** — स्वर्गसुखं, आनन्दंवाप्राप्तुं।

एवम्जीवःतामसतःसात्विकंप्रतिप्रगतिंकरोति।

हेतुकीभक्ताःअपित्रिविधाः –

**(१) आर्तः** – संकटेस्थित्वारक्षणार्थंईश्वरंप्रार्थयति।

**(२) जिज्ञासुः** – तत्वज्ञानार्थंभजते।

**(३) अर्थार्थी** – काम्यवस्तुंलब्धुम्इच्छति। यद्यपिएतेभक्ताःपूर्णभक्ताः नसन्ति, तथापितेषुपराभक्तेः संभावनाअस्ति। ध्रुवस्यदृष्टान्तेएवम्दृश्यते – अर्थार्थित्वादारभ्य, अन्तेअहेतुकीभक्तिप्राप्ता। सा एव अनन्या-भक्तियांगीताउपदिशति। सा एव निष्कामभक्ति। तस्यापरा-काष्ठाप्रपत्तिः।एवमेवयाभक्तिःशुद्धा, पूर्णाच। भक्तेःचप्रपत्तेः चसूक्ष्मभेदः भक्तेःचप्रपत्तेः चमध्येसूक्ष्मः भेदःदृश्यते। यदाजीवःआत्मनः सर्वस्वं ईश्वरायसमर्पयति, स्वयंसर्वथानिरपेक्षंकरोति, तदासाप्रपत्तिः इत्युच्यते। भक्तिः तुसायाययाजीवः मुक्तिंप्रार्थयन्ईश्वरस्यसाक्षात्का-रायआराधनांप्रार्थनांचकरोति। प्रपत्तिः शरणागतिभक्तेः एवविशेष-रूपम्।प्रपन्नःतुतादृशः शिशुः इव, यः सर्वंपित्रेसमर्पयित्वानिर्भारः भवति। भक्तः तुयौवनस्थितः पुत्रःइव,यः निजकर्तव्यम् अनुसृत्यस्व-कर्मकुर्वन् ईश्वरंसेवते। केचित्विचारकाः मन्यन्ते यत्प्रपत्तौभक्ति, कर्म, ज्ञानत्रयमपिअन्तर्भवति। अतः सासर्वेषांसाधनानांमध्येश्रेष्ठामन्यते। अन्येसर्वेसाधनपथाः तस्यैएवपुरः सराः भवन्ति। प्रपत्तेःषड्भेदाः (षट्सङ्गतयः) निरूपिताः—

**1. आनुकूल्यस्यसङ्कल्पः** — यानिकर्माणिभगवताप्रियाणि, तानिकर्त-व्यानि।

**2. प्रातिकूल्यस्यवर्जनम्** — यत्ईश्वरस्यअप्रियं, तत्त्याज्यमेव।

**3. रक्षिष्यतीतिविश्वासः** — ईश्वरएवनिश्चितंमामवरक्षिष्यति-इतिदृढविश्वासः।

**4. गोप्तृत्ववरणम् —**ईश्वरएवममगोप्ताइतिस्वीकारः।

**5. कार्पण्यम् —**आत्मनःदीनत्वंभगवतिप्रकाशयितव्यम्।

**6. आत्मनिक्षेपः** — पूर्णंआत्मसमर्पणंभगवतिकर्तव्यम्।

एषाषट्कर्तव्याप्रपत्तेः मूलंस्वरूपं च—

**"आनुकूल्यस्यसङ्कल्पःप्रातिकूल्यस्यवर्जनम्।**
**रक्षिष्यतीतिविश्वासोगोप्तृत्वेवरणंतथा॥**
**"आत्मनिक्षेपकार्पण्येषट्पदाशरणागतिः।**
**आत्मनिरपेक्षताएवखलुप्रपत्तेःसारतत्त्वम्॥"**[5]

एवमेवप्रपत्तिः भक्तेः सारस्वरूपंरूपंच।

**• भक्तेःयोग्यता (पात्रता)**

भक्तेःउत्पत्तिःकेवलंसरलनिष्कपटहृदयेसम्भवति।

यदिभक्तस्यअन्यगुणानां अभावोऽपिअस्ति, तथापिविनयीहृदयः, वात्सल्ययुक्तंचआचरणंआवश्यकम्। भक्तेः मूलंश्रद्धा — ईश्वर्येअविचल-श्रद्धाआवश्यकैव। श्रद्धायाः द्वाराएवईश्वरप्रेमोद्भवः सम्भवति। श्रद्धाहीनंहृदयम् ऊषरभूमिः इव — यत्रभक्तिबीजस्यविकासः नसम्भवति। संशय, तर्क, द्वन्द्व, रागद्वेषरहितःचजीवः, यः भगवति-अनुरक्तःअस्ति, तस्यहृदयेएवभक्तेः स्फुरणंसम्भवति। ईश्वर्येरागः प्रेमश्रद्धाचएवभक्तेः आधारभूताः भावाः।

**"यदृच्छयायत्कथादौजातश्रद्धास्तुयःपुमान्।**
**ननिर्विण्णोनातिसक्तोभक्तियोगोऽस्यसिद्धिदः॥"**[6]

यः पुरुषः यदृच्छयाभगवतःकथायाम्श्रद्धांलभते, नचसंसारतः सर्वथा-विरक्तः, नचअतीवासक्तः, तस्यभक्तियोगः सिद्धिदंभवति। अतः भक्तेः पात्रतायांश्रद्धा, अनुरागः, प्रेमचआवश्यकाः किन्तुतानिचिन्तनमनन-नाद्यनुगुणानिचभवितव्यानि।जीवःभगवतःस्वरूपे, तत्त्वे, गुणेषु, निरन्तरंचिन्तनंमननंध्यानंचकुर्वन्भक्तेःपथेअग्रेसरति।

**•श्रवण-मनन-निदिध्यासनप्रक्रिया**

वर्णनीयं यत् आध्यात्मिकसत्यस्यग्राह्यविधिः श्रवणम्इत्युच्यते। किन्तु केवलंश्रवणं ज्ञानप्राप्तयेपर्याप्तंनभवति। भक्तेनस्वयमेवतेषु-

विषयेषुतार्किकंविवेचनंकर्तव्यम्। श्रुतानिमहावाक्यानिधार्मिक सत्यां- श्चतेषांनिश्चिततांप्रामाणिकतां च मनसिदृढतया निश्चेतव्यम्। एषायाबौद्धिकचिन्तनविवेचनरूपप्रक्रिया, मननम्इत्युच्यते। एवंता- वत्शिष्यः वाजिज्ञासुभक्तः केवलंबौद्धिकंज्ञानंप्राप्तवान्इवदृश्यते। किन्तु तस्यज्ञानं प्रत्यक्षानुभववर्जितंभवति, अतःतदज्ञानंचअनिश्चितंस्यात्। अतः वास्तविकंज्ञानंप्राप्तुंतृतीयंचअन्तिमं च अवस्थारूपंनिदिध्या- सनम्आवश्यकम्। शिष्यः निरन्तरविचारमाध्यमेन च ध्यानयोगेन- चसत्यज्ञानंदृढंनिश्चलञ्चकरोति।

एषाप्रक्रियाआत्मज्ञानायब्रह्मज्ञानायचपरमावश्यकम्। श्रवणं, मननं, निदिध्यासनं — एतेषांत्रयाणांसाधनानांद्वाराअविद्यायाः नाशः सञ्जायते। एवमेवआत्मनः अथवाब्रह्मणः साक्षात्कारः सम्भवति- मोक्षश्चलभ्यते।

**•ज्ञानयोगेशरीर-आत्मभेदः**

ज्ञानयोगेस्थूलशरीरात्आरभ्यसूक्ष्म, कारण, महाकारणततः अति- महाकारण शरीरपर्यन्तंपञ्चीकरणदृष्ट्याविवेचनंक्रियते।अन्वयव्यतिरे- काभ्यांचशरीरस्यआत्मनः चभिन्नतासिद्ध्यति। चित्तवृत्तेः लयः साधयित्वायोगीज्ञानस्यसप्तभूमिकाःअतिक्रम्यआत्मसाक्षात्कारंप्राप्नोति।

**•शैवदर्शनेतत्त्वमीमांसा**

शैवदर्शनेषुषट्त्रिंशत्तत्त्वानिषट्त्रिंशत्तत्त्वानिपदार्थस्वरूपेणप्रतिष्ठितानि ।तानित्रीषुअध्वसुविभागेनविवक्षितानि।परमशिवः, पूर्णाहन्तारूपेण- स्थितः। यदातस्यअहन्ता "इदन्ता" (विषयवस्तु) संबन्धंप्राप्नोति- तदासदाशिव, ईश्वर, शुद्धविद्या — एतेतत्त्वानि शुद्धाध्वनिप्रतिष्ठिता- निस्युः।शक्तेःसंकोचितंरूपं मायाइतिज्ञायते। तस्यांसंकुचितेशक्तेः पञ्चशक्तयः काल, नियति, विद्या, राग, कलाइत्याख्याः पञ्चकञ्चुक रूपेण परिणमन्ति। तस्माद्कञ्चुकितचेतनंजीवः, अणुः इत्युच्यते। एतेसप्ततत्त्वानिमिश्राध्वनिनिर्दिष्टानि। मायायाः संकुचितंरूपं -प्रकृतिः। तस्मात्चबुद्धि, अहंकारः, मनः, इन्द्रियाणिदश, तन्मात्राणिपञ्च, भूतानि पञ्चइत्येवंतत्त्वानि सांख्य दर्शनेउक्तैः चतुर्विंशतितत्त्वैः तुल्यानिभवन्ति।एते अशुद्धाध्वनिगण्यन्ते। एवंसम्पूर्णंतत्त्वचक्रंशुद्ध, मिश्र, अशुद्धइतित्र्यध्वन्यांव्यवस्थितम्।

**तत्त्वानांअवस्थापनम्चतुर्भिःअण्डैः-**

१. शिव + शक्ति→**शक्त्यण्डम्**

२. सदाशिव, ईश्वर, शुद्धविद्या→**शुद्धाध्वा**

३. काल, कला, राग, नियति, विद्या, माया, अणुः→**प्रकृत्यण्डम्**

४. प्रकृतिः, बुद्धिः, अहंकारः, मनः, इन्द्रियदशकं, पञ्चतन्मात्राणि, पञ्चभूतानि→**क्षित्यण्डम्**

दाक्षिणात्यदर्शनेद्वैतवादिनांशैवदर्शनेचकिञ्चनभेदेनैवतत्त्वव्यवस्थादृश्य ते।पतिः पशुः पाशभेदेनश्चप्रमेयविन्यासोवर्णितः।

**विकल्परहितंतत्त्वंज्ञानमानन्दमव्ययम्।**

**नचनामानिरूपाणिशिवस्यपरमात्मनः॥**[7]

निर्विकल्पंयत्तत्त्वंतत्ज्ञानस्वरूपंआनन्दमयंचअव्ययमस्ति।एवंशिवःपर- मात्मानतुनामरूपवान्सएवपरमप्रमेयः।

**जगज्जन्मस्थितिध्वंसतिरोधानविमुक्तयः।**

**कृत्यंसकारकफलंज्ञेयमस्यैतदेवहि॥**[8]

जगतः सृष्टि- स्थितिः- संहारः- तिरोधानः- मोक्षश्च एषांकर्तासः परमेश्वरएव। सएवकर्मफलदातृ—कर्तृत्वेनसह। अयंचपशुपतिः अवस्थाभेदेनत्रिविधः— शक्तः, उद्युक्तः, प्रवृत्तः च इति।

**शक्तः**—यदासर्वंकार्यंलीनंस्यात्उपादाने, तदाकेवलंजननशक्तिमात्रयुक्तःशिवःशक्तइत्युच्यते।

**उद्युक्तः**—यदाशक्तिःकार्यप्रसवाभिमुखीस्यात्तदाउद्युक्तः।

**प्रवृत्तः**—यदासाशक्तिकार्यसृजनेप्रवृत्ता, तदाशक्तियुक्तः प्रवृत्तः उच्यते।

**षट्त्रिंशत्तत्त्वानि – तद्विभागः**

शैवागमशास्त्रेषुतत्त्वानिषट्त्रिंशत् (३६) निर्दिष्टानि, तानित्रिषुमुख्य- वर्गेषुविभागयन्ति—

**१. शिवतत्त्वम्**

(१) शिवतत्त्वम्

(२) शक्तितत्त्वम्

परमशिवः प्रकाशविमर्शात्मकोऽस्ति। प्रकाशःशिवस्वरूपः, विमर्शः शक्तिरूपः।

विमर्शएवपूर्ण "अहं" भावना, यास्वात्मविकासकृताविश्वसृष्टेःकारणम्।

**२. विद्यातत्त्वम्**

(३) सदाशिवतत्त्वम् — "अहंइदम्"

(४) ईश्वरतत्त्वम् — "इदंअहम्"

(५) शुद्धविद्यातत्त्वम् — "अहं च इदंच"

अत्रअहं - इदम्इत्येतेद्वयंअपिअविभक्तम्, केवलंअभिव्यक्तता-व्यक्तता- भेदः दृश्यते।

**३. आत्मतत्त्वम्**

(६) माया — भेदबुद्धेःप्रारम्भः, अहं-इदंभेदकृता।

(७–११) पञ्चकञ्चुकानि —

(७) कला — सर्वकर्तृत्वस्यसंकोचः।

(८) विद्या — सर्वज्ञत्वसंकोचः।

(९) रागः — पूर्णतृप्त्याःसंकोचः।

(१०) कालः — नित्यत्वस्यसंकोचः।

(११) नियति — स्वातन्त्र्यस्यसंकोचः।

एतेषांपञ्चकञ्चुकानांसंयोगेनजीवःउत्पद्यते।

**४.बन्धकारणम्**

(१२) आणवमलः — आत्मस्वरूपस्वातन्त्र्यज्ञानस्यअभावः।

(१३) मायीयमलः — मायासंयोगतःउत्पन्नोभेददृष्टिकरः।

(१४) कार्ममलः — कर्मफलासक्तितयाउत्पन्नःबन्धः।

**५.स्थूलतत्त्वानि (१५-३६)**

(१५) पुरुषः

(१६) प्रकृतिः

(१७) बुद्धिः

(१८) अहङ्कारः

(१९) मनः

**पञ्चज्ञानेन्द्रियाणि—** (२०-२४): श्रोत्र, त्वक्, चक्षुः, जिह्वा, घ्राणम्

**पञ्चकर्मेन्द्रियाणि—** (२५-२९): वाक्, पाणि, पाद, पायु, उपस्थ

**पञ्चतन्मात्राणि—** (३०-३४): शब्द, स्पर्श, रूप, रस, गन्ध

**पञ्चमहाभूतानि—** (३५-३६): आकाश, वायु, तेज, आपः, पृथिवी

एवंसम्पूर्णविश्वंशिवतत्त्वप्रसूतंदृश्यते।जीवःमायामलादिभिःबन्धनमवाप्यसंसृतिंप्राप्नोति।शुद्धविद्ययाविमुक्तत्वंलभते।भक्तेःकृतेनविशेषःकश्चन आवश्यकः — न तु जातिः, न वयः, न लिङ्गं, न च धनसम्पत्तिः। एषामान्यताश्चामिकायत्केवलंप्रौढावस्थायामेव मनुष्यः भक्तिंसम्पादयितुंसमर्थः स्यात्। वास्तवेतुकौमारावस्थाएवभक्तेः विकासायश्रेष्ठतमः कालः। बालकस्यहृदयंरागद्वेषादिनासंसारिणाअपिअप्रभूतं, स्वभावतः पवित्रं, कोमलंचभवति। तस्मिन्भगवद्भक्तेः बीजंसहजतयासंस्थापयितुंशक्यते।प्रह्लादःध्रुवश्चएतस्यप्रमाणरूपेणप्रसिद्धौ—

प्रह्लादःनिष्कामभावेनभगवतःविष्णोःभजनंकृतवान्, यथासएवभक्तिश्रेष्ठत्वस्यमूर्तिमान्प्रतीकः।ध्रुवस्तुआत्मनोच्छ्रयार्थंप्रभोःआराधनांकृतवान्, तथापितयोःभक्तिःभगवत्प्रसादनायकारणमभवत्।

**कौमारं आचरेत्प्राज्ञोधर्मान्भागवतानिह।**
**दुर्लभंमानुषंजन्मतदप्यध्रुवमर्थदम्॥**[9]

अर्थात् — प्राज्ञः पुरुषः कौमारएवभागवतान्धर्मान्आचरेत्। मानुषंजन्मदुर्लभं, चतदपिनित्यंनस्यात्, किन्तु परमंअर्थदंभवति- जात्यादिसाम्यंभक्तेः क्षेत्रेभक्तेः कृतेजातिःवर्णः लिङ्गंचनकदापिप्रतिबन्धकः।चाण्डालस्यापियदिहृदयंविशुद्धंभगवन्मयंचस्यात्, तदातस्यभक्तिः अपिब्राह्मणस्यभक्तेः समानाभवति। प्रेम्णाचाण्डालोऽपि भगवानंस्वंकरोति विना प्रेमणाब्राह्मणोऽपि भगवतः प्रियःनभवति।

**एवमष्टविधंचिह्नंयस्मिन्म्लेच्छेऽपिदृश्यते।**
**सविप्रेन्द्रोमुनिःश्रीमान्सयतिःसचपण्डितः॥**
**नमेप्रियश्चतुर्वेदीमद्भक्तोह्यपिशूद्रकः।**
**तस्मैदेयंततोग्राह्यंसचपूज्योयथाह्यहम्॥**[10]

अर्थात् - यदिभक्तेः अष्टलक्षणानिम्लेच्छेऽपिदृश्येरन्, तर्हिसएवब्राह्मणश्रेष्ठः, मुनिः, सन्न्यासी, पण्डितः च।मद्भक्तः शूद्रोऽपिमेप्रियः, चतुर्वेदीयद्यपिनभवति। भक्तेः कृतेनसम्पदः आवश्यकाः भक्तेः पन्थाः सर्वेभ्यःसमः — नधनी, ननिर्धनः भेदःअस्ति। वास्तवेतुनिर्धनः, असहायःचसहजतयाभक्तिमार्गंस्वीकरोति। ईश्वरःचदीनानाथानांनाथः, कृपानिधिःच। ईसा: उवाच —"सूलस्यछिद्रेणगमनंऊँटस्यसुलभं, नतुधनिनः स्वर्गारोपणम्" इति। धनमेव बहूनांदोषाणांमूलम्। परीक्षितेनकलिः स्वर्णेनिवासाय नियोजितः। दुर्योधनस्यऐश्वर्यंपरित्यज्य, श्रीकृष्णः विदुरस्यसादृशंभोजनंस्वीकृतवान्।

**•भक्तेःरूपाणि**

भक्तेःअनेकानिरूपाणिभवन्ति।पूज्यविषयदृष्ट्याभक्तिः द्विधापरिगण्यते—

प्रतीकभक्तिःचप्रतिमाभक्तिःच।प्रतीकभक्तौभगवत्स्वरूपस्यपूजनंप्रतीकरूपेणक्रियते।यथा — अग्निः, सूर्यः, पर्वतः, नदी, वृक्षः, इत्यादयः प्रकृतिसम्बन्धिनः पदार्थाः पूज्यन्ते। प्रतिमाभक्तौईश्वरस्यपूजनंप्रतिमारूपेण, मूर्तिरूपेणवाक्रियते। मूर्तिपूजाप्रतिमाभक्तेः प्रमुखंउदाहरणंभवति।वैदिकेकालेबहुदेववादेप्रतीकपूजायाःप्रमुख्यंदृश्यते।वैदिकदेवताः प्रायःप्रतिमानांस्थानेप्रतीकभूतैःरूपैःपूजिताः। एतयोः भक्त्योरयंविभागः अस्थायिः नतुपरमार्थतः भिन्नः। वास्तवेतुसर्वाभक्तिः प्रतीकात्मकएव। श्रीचैतन्यमहाप्रभोःअनुसारभक्तिरूपाणि

**•पञ्चभक्तिसाधनानि —**

१. साधुसङ्गः
२. श्रीकृष्णस्यपूजा
३. शास्त्राध्ययनम्
४. नामजपः
५. वृन्दावनवासः

एतेषांकस्यचित्एकस्यापिसेवनेनभगवत्स्नेहोलभ्यते। गीतातः भगवतः मतम्आत्मसमर्पणंभगवद्भक्तेःश्रेष्ठतमं, सुलभंचरूपंमन्यते। यदाजीवः स्वकृतानिसर्वाणिकर्माणि, चिन्तनानि, अनुभवानिचईश्वरायसमर्पयति, तदासाभक्तिःपरमास्यात्।

**•नवधाभक्तिः (नारदीयभक्तिसूत्रेनिर्दिष्टा)**

**श्रवणंकीर्तनंविष्णोःस्मरणंपादसेवनम्।**
**अर्चनंवन्दनंदास्यंसख्यमात्मनिवेदनम्॥**[11]

१. ***श्रवणम्*** – भगवतःलीलाकथाश्रवणम्
२. ***कीर्तनम्***– भगवन्नामसङ्कीर्तनम्
३. ***स्मरणम्*** – ईश्वरस्मृतिः
४. ***पादसेवनम्*** – चरणयुगलसेवा
५. ***अर्चनम्*** – पूजारूपाभक्ति
६. ***वन्दनम्*** – नमस्कारः
७. ***दास्यम्*** – दासभावः
८. ***सख्यम्*** –सख्येनप्रेम
९. ***आत्मनिवेदनम्*** – सर्वस्वार्पणं

**•भक्तेःभावरूपविचारः**

भक्तेःविविधभावाःअपिप्रसिद्धाः—

**सन्तभावः** – संतवत्बौद्धिकप्रेमयुक्तःभावः

**दास्यभावः** – भगवतःसेवकवत्भक्तिरूपः

**सख्यभावः** – भगवान्सखारूपेणदृष्टव्यः, गोपबालकैःयथा

**वात्सल्यभावः** – दशरथयशोदयोःयथा, भगवान्प्रतिपालकवत्भावः
**मातृभावः/पितृभावः** – भगवतः प्रतिमाता- पित्रोः तुल्यः अनुरागः
**माधुर्यभावः** – श्रीकृष्ण- गोपीनांमध्येइव, भगवत्स्नेहंप्रियतमवत्-अनुभवनम्।
भक्तेः भावरूपाणिदृष्टिकोणभेदेनभगवद्भक्तेः नानाविधानिरूपाणि-सम्भवन्ति।
एतेभावाःसामान्यतःशान्तभाव, दास्यभाव, सख्यभाव, वात्सल्यभाव, मातृभाव, तथामाधुर्यभावइत्यादिरूपेणपरिगण्यन्ते।
***शान्तभावः***- अत्रभक्तः सन्तवत्बौद्धिकप्रीत्याभगवतः चिन्तनंकरोति। अयंभावः ईश्वरस्यसर्वकर्ता, सर्वव्यापक, अनन्तस्वरूपत्वेदृढबुद्धेः परिणामः।
***दास्यभावः***— अत्रभक्तः भगवन्तंस्वंस्वामिनंमन्यते, स्वंतुतस्यदासंइव-अनुभवति।
सेवाभावप्रधानंएषभक्तिस्वरूपम्।
***सख्यभावः***— अत्रजीवःभगवन्तंआत्मनःसखायंरूपेणपश्यति। अयंभावः जीवस्य ईश्वरसंबन्धेस्नेहयुक्तमित्रतायाः प्रतीकः। श्रीकृष्णस्यगोप-बालकैःसहसम्बन्धःअस्यभावस्यद्योतकःअस्ति।
***वात्सल्यभावः*** — दशरथस्ययशोदायाश्चयथादृष्टं, अत्रभक्तः भगवन्तं आत्मसन्तानवत्पश्यति, पालकत्वेनस्नेहंप्रकाशयति।
***मातृभावः*** -अत्रभक्तः भगवन्तंमाता - पितृरूपेणअनुभूय, पुत्रवत्भजनं-करोति। धार्मिकपरम्परायांअयंभावःविशेषतःप्रतिपाद्यते।
***माधुर्यभावः***—अत्रभक्तःभगवन्तंस्वप्रियतमरूपेणपश्यन्, आत्मानंतस्य-प्रेयसीरूपेणअनुभवन्ति। गोपीभिः श्रीकृष्णेयःप्रेममयःसम्बन्धःअस्ति, समाधुर्यभावस्यपरमंउदाहरणम्! भगवतः शिवस्यभक्तिविषयकवच-नानिश्रीभगवानुवाच --

**“मद्भक्तजनवात्सल्यंपूजायामनुमोदनम्।**
**स्वयमभ्यर्चनंभक्त्याममार्थेचाङ्गचेष्टितम्॥”**[12]

ममभक्तानांप्रतिवात्सल्यभावः, पूजारूपाणांकर्मणांअनुमोदनं, स्वयं-भक्ति पूर्वकंपूजनंचममप्रियं।

**"विधिभक्तिविनानैवभक्तिर्भवतिवैष्णवी।**
**विष्णुभक्तिंविनामेनभक्तिःक्वापिजायते॥”**[13]

ब्रह्मविष्ण्वादीनांभक्त्यनुसारेणशिवभक्तिप्राप्तिः भवति। ब्रह्मभक्ताः विष्णुभक्ताभवन्ति, विष्णुभक्ताः शिवभक्तत्वंप्राप्नुवन्ति। शिवभक्तेः माहात्म्यम्

**"लाभस्तेषांमनुष्याणांयेशिवंशरणंगताः।**
**तेषांदिवाचरात्रौचनित्यंशिवगतास्मृतिः॥**
**नमस्कारादियुक्तःसन्शिवाययःअर्चतेत्रिकालम्।**
**जिह्वाग्रेवर्ततेयस्यशिवनामसजीवितंसफलम्॥”**[14]

शिवंशरणंप्राप्ययेजनाः,तेषांजीवनंशिवस्मृतिपूरितंभवति।त्रिकालंनमस्कारादिनापूजांकृत्व, येनजिह्वायाम् "शिव" इतिनामसदावर्तते, तस्यजीवनंसफलम्।
**शिवभक्तेःदुर्लभत्वं"**

**सुदुर्लभाशिवेभक्तिः, दुर्लभंचशिवार्चनम्।**
**सुदुर्लभंशिवेदानं, शिवहोमःचदुर्लभः॥**[15]

इत्युक्ते :- सुदुर्लभंशिवज्ञानं, तस्याभ्यासः अपिदुर्लभः। सुदुर्लभ-मिदंज्ञानं, शिवेभक्तिंसमाश्रयेत्॥”
भगवतःशिवस्यभक्ति, अर्चनं, दानं, होमः, ज्ञानं, चसर्वंसुदुर्लभं, किन्तुमहाशुभप्रदंच।
शैवभक्तेः दुर्लभत्वंतथाभक्तेः प्रकारविभाजनम्तथातस्मैदानंदातुं, शिवहोमंकर्तुंचसुदुर्लभंभवति। एवंशिवज्ञानंअपिदुर्लभं, तस्यपुनःपुनः अभ्यासःअपिदुर्लभःइत्युक्तंश्रूयते।
अतः— ***"एवंज्ञात्वाशिवभक्तिंसमाश्रयेत्।"*** भक्तिजगतिदृष्टव्यंयत् — यथाविहङ्गशिशवः पक्षरहिताः मातरंप्रतिव्याकुलाः भवन्ति, यथा-बालवतःक्षुधयाक्षुब्धः वत्सःस्तन्यायधावति, यथाप्रियवियोगविह्वला-सतीस्वप्रियमपश्यन्तीस्त्रीतंस्मृत्वात्वरते एवंभक्तः अपिभगवन्तं-प्रतितादृशेनप्रेम्णाछटपटति। एषा प्रेममयीभक्तियथागोपीकानां श्रीकृष्णेअव्याजस्नेहः — तस्यविवेचनंव्यासमहर्षिणारासपञ्चाध्याय्यांकृतम्। भागवतशास्त्रे, यः भक्तिरसामृतप्रवाहःप्रभवति, सभक्तजनानांहृदयंआप्याययति। एवं च जीवः जगतश्चभगवतोरूपमेवइतिशास्त्रम्।
भक्तेः त्रैविध्यंअतः अत्रशक्त्याः स्वरूपेयथाभेदः दृश्यते, तथाभक्तेः अपित्रैविध्यंपरिगण्यते

**१. श्रावणाभक्ति (शास्त्रश्रवणपूर्वकभक्ति)**
**२. प्रेममयीभक्ति**
**३. साधनाभक्ति**

यथा — "साभक्तिःसाधनंभावःप्रेमाचेतितित्रिधोदिता" इति।
शैवागमेअपित्रिविधः विभागः एवंमयास्वप्रथमाध्याये (शैवागमे) अपित्रयः विभागाः कृताः —

***१. भेदप्रधानंशैवमतम्***
***२. भेदाभेदप्रधानंशैवमतम्***
***३. अभेदप्रधानंशैवमतम्***

*शैवभक्तेःत्रैविध्यम्* —

**साभक्तिःसाधनंभावःप्रेमाचेतितित्रिधोदिता।**
**श्रवणाद्यैःसमारब्धा, पुष्टाभावेननिर्मला॥**
**नैवसंपत्तिमिच्छामि, नस्वर्गं, नचमुक्तिम्।**

**त्वमेवमेपरमंध्येयं, त्वमेवहिशिवोमम॥**[16]

***•शैवभक्तिसंवादरूपेण-शिष्यः:*** गुरो! किंशिवभक्तेःस्वरूपं? कातस्यादुर्लभता?

***गुरुः:*** वत्स! शिवभक्तिःसुदुर्लभा।

शिवस्यपूजनं, तस्मैदानं, होमं, ज्ञानंच —

एतत्सर्वंदुर्लभंलोके।

***शिष्यः:*** किंलक्षणंसाभक्तिः याशिवप्रियंभवति?

***गुरुः***यत्रहृदयमग्निःशुद्धः, निःस्वार्थःचप्रेमानुगतः।

यत्रनद्रव्येनस्वर्गेनमुक्तौस्पृहायते —

साभक्तिःशिवप्रियतमम्।

**सूत्रशैली– शैवभक्तिप्रकरणम्**

१. शिवभक्तिःश्रद्धासम्पन्नाप्रेमपूरिताच।

२. सात्रिधा – श्रवणपरकत्वेन, भावयुक्तत्वेन, प्रेमस्वरूपत्वेनच।

३. साधनाभक्तिः – जपपूजानुष्ठानरूपा।

४. भावभक्तिः – सेवक-सख्य-वत्सल्यादिभावयुक्ता।

५. प्रेमभक्तिः – गोपीवत्अनन्य-अव्याज-स्नेहयुक्ता।

६. शिवज्ञानंतदनुभवश्च — सुदुर्लभम्।

७. शिवानुस्मृतिरेवपरमार्थः।

सम्बद्धग्रन्थानुक्रमणिका

*** मूलग्रन्था :**

- अद्वैतसिद्धिः- बालवोधिनीव्याख्यासहिता, योगेन्द्रनाथदेवेन्द्रशर्मा, तारापब्लिकेशन्स चेन्नै २००६ ।
- ईशावास्योपनिषदः (शाङ्करभाष्यम्) - मोतीलालवनारसीदासः, वाराणसी, १९७८
- उपनिषद्संग्रहः – सम्पादकः पं. जगदीशशास्त्री, सोतीलालवनारसीदासः, पुनर्मुद्रितसंस्करणम्, नवदेहली, १९९८ ।
- कश्मीर शैव दर्शन में साधना और यम-नियम -ईश्वर लक्ष्मण जी महराज ।
- काश्मीर शैवदर्शन और कामायनी - चौखम्बा राष्ट्रभाषा ग्रन्थमाला - डॉ. भैरवलाल जोशी !
- काश्मीर शैव संस्कृति में कुल क्रम मत रस्तोगी नवजीवन २०११ !
- खण्डनखण्डखाद्यम् श्रीहर्षः, चौखाम्बा संस्कृतसंस्थानम्, वाराणसी, १९४८।
- गीताभाष्यम् - भगवद्रामानुजाचार्यः, उभयवेदान्त ग्रन्थमाला , मद्रासा १९९१ !
- तमिल शैव भक्ति कवि अप्पर दिल्ली: साहित्य शोध संस्थान, २००२! सेठः रवीन्द्र कुमार; नयी दिल्ली : साहित्य शोध साहित्य, २००२
- कुमार तमिल शैव भक्त कवि सुन्दरमूर्ति नायनार- सेठ रवींद्र २००३
- तंत्रागमीय धर्म दर्शन-- ब्रजवल्लभ द्विवेदी २००० !
- निगम तथा शैव शाक्त वैष्णव आगम परम्पराओं का सम्बन्ध - अच्युतानन्द २०१० !
- प्राचीन भारत मे शैवधर्म नीलम रानी !
- पाशुपत शैव धर्म एवं दर्शन - आलोक मणि त्रिपाठी !
- बौद्ध वेदान्त एवं काश्मीर शैव दर्शन -- विकेक पब्लिकेशन सूर्यप्रकाशव्यास - अलीगढ़
- बौद्ध वेदान्त एवं काश्मीर शैवदर्शनश्री सूर्यप्रकाश व्यसि विवेक पब्लिकेशन, अलीगढ़ , १९८६
- भारतीयदर्शन - आचार्यबलदेव उपाध्याय, चौखम्बा ओरिएण्टल वाराणसी १९७६
- महाभारत में शैव धर्म- अंजू ओझा।
- विज्ञानभैरवः - श्री क्षेमराजाचार्य वाराणसी। चौखम्बा सुरभारती प्रकाशन
- वैष्णवशैव और अन्यधार्मिकमत भण्डारकर, भारतीय विद्याप्रकाशन श्री राम कृष्ण गोपाल वाराणसी १९७७ !
- शिव स्वरूप तथा शैव सिद्धान्त सीमा शुक्ला; २००४ !
- **शिव - तन्त्र रहस्य**- डॉ. रचना शेखावत ।
- **शिवपुराण -** डॉ. ब्रह्मानन्द त्रिपाठी (व्रज. प्राच्यग्र. ७६)
- **शैव पारिभाषाः-** रङ्गास्वामी ओरिएन्टल रिसर्च इंस्टिट्यूट १९५०!
- **शैव मतः** बिहार राष्ट्र भाषा परिषद्, पटना १९५५ !
- **शैव उपनिषद्** ब्रह्मयोगी !
- **सर्वदर्शनसंग्रह -** डॉ उमाशंकर चौखम्भा वाराणसी २००२ !
- **तन्त्र - यात्रा** ब्रज वल्लभ द्विवेदी रत्न पब्लिकेशन; वाराणसी
- **श्री: काश्मीर शैव दर्शन** बलजिन्नाथ पण्डित शास्त्री।
- **श्री भाष्यम्** - रामानुजाचार्यः, विशिष्टाद्वैतवेदान्तः - प्रचारिणी सभा, मद्रासा १९६१ !
- **श्री मद्भगवद्गीता -** शङ्कर भाष्यम्, गीताप्रेस, गौरखपुरम २०१८ !
- **श्रीमद्भागवतम् -** सामयिकी हिन्दी टीका सहित श्रीरामतेजपाण्डेय !
- **श्री लक्ष्मी तन्त्र धर्म और दर्शन** - डॉ. अशोक कुमार !

**सहायकग्रन्थाः**

- **तर्कभाषा -** केशवमिश्रः, मोतीलालवनारसीदासः, पटना, १९६८।
- **तर्कभाषा -** श्रीगङ्गाधरकरन्यायाचार्य, सागरिका प्रेस, ९, एन्टनि 18. बागानलेन, कलकाता - ९॥
- **तर्कसंग्रहः -** दीपिकाप्रकाशिकोपेतः, अन्नंभट्टः, सम्पादकः, डा. वीजिनाथन् ।

- **तत्त्वप्रदीपिका -** चित्सुखाचार्यः, चौखाम्बासंस्कृतविद्याभवनम, वाराणसी, १९८७।
- **तन्त्रालोक -** अभिनवगुप्त, काश्मीर संस्कृत ग्रन्थावली।
- **तन्त्रालोकविवृत्ति -** काश्मीर संस्कृत ग्रन्थावली।
- **पुराणविमर्श -** आचार्य वलदेव उपाध्याय, चौखाम्बा विद्याभवन, वाराणसी १९८७।
- **पुराणमीमांसा -** श्रीकृष्णमति हि. प्र. मण्डल, लखनऊ, १९६१।
- **ब्रह्मसूत्रशाङ्करभाष्यम्** (रत्नप्रभासहिता) शङ्कराचार्यः, सं. पं स्त्रीचम्डी प्रसादशुक्लः, पं।
- **श्रीकृषअणपत्नशास्त्री,** भाषानुवादकः भोलेवावा, १९९३।
- **ब्रह्मसूत्रशाङ्करभाष्यम् –** यतिवरश्रीभोलेवावा भारतीयविद्याप्रकाशनम्, वाराणसी - २००२।
- **भामती** (शारीरकभाष्यव्याख्या) - अनन्तकृष्णशास्त्री, निर्णयसागर प्रेस, बम्बई, १९३८।
- **गौडपादकारिका शाङ्करभाष्य -** मुण्डकोपनिषद्सहितम् गीताप्रेस, गोरक्षपुरम्, संस्करणम्।
- **मुक्तिवादः -** हरिरामतर्कवागीशः, एशियाटिक सोसाइटी, कोलकाता, १९७३।
- **वाक्यपदीयम भर्तृहरिः,** सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी, १९९१।
- **विवेकचूडामणिः** भगवान् आदिशंकराचार्यः, सम्पूर्णानन्दसंस्कृत विश्वविद्यालयः, वाराणसी, १९८४।


**सन्दर्भाः**

1 (भागवतपुराणम्७/५/२३)

2 (श्रीमद्भागवतम्११/१४/१४)

3 (श्रीमद्भगवद्गीतायां१८/६६)

4 भक्तिरसामृतसिन्धु

5 (श्री वैष्णवतंत्र)

6 (श्रीमद्भागवतपुराणे (११/२०/८)

7 स्कन्दपुराणम्१६/२१/२९

8 (मृगेन्द्रागमः२/९)

9 (श्रीमद्भागवत, ७.६.१)

10 (शिवपुराणे, ७.२.१०.७०)

11 (नारदीयभक्तिसूत्रे)

12 (शिवपुराणेवायवीयसंहिताउत्तरखण्डे)

13 (लिङ्गपुराणे)

14 (स्कन्दपुराणे)

15 (शिवरहस्यम्,तञ्जावूरसरस्वतीभाण्डागारात्)

16 (शांडिल्यभक्तिसूत्र)